हवन मंत्र (देव यज्ञ)

यज्ञ 45 मिनट, भजन 15 मिनट, स्वाध्याय सत्संग 30 मिनट।

मंत्रोच्चारण यजमान ही करें। यदि यजमान मंत्रोच्चारण करने में असमर्थ हो तो पुरोहित मंत्रोच्चारण करें और कर्म यजमान के हाथ से करावें।

आचमन मन्त्र

नीचे लिखे आचमन–मन्त्रों से तीन आचमन करें–

1. ओं अमृतोपस्तरणमसि स्वाहा।
2. ओं अमृतापिधानमसि स्वाहा।
3. ओं सत्यं यशः श्रीर्मयि श्रीः श्रयतां स्वाहा।

इन्द्रियस्पर्श मन्त्र

बायीं हथेली में जल लेकर दाहिने हाथ से नीचे लिखे मंत्रों को पढ़कर अंगों का स्पर्श करें।

ओं वाङ्मेऽआस्येऽस्तु।।1।। (इस मन्त्र से मुख)

ओं नसोर्मे प्राणोऽस्तु।।2।। (इससे नासिका के दोनों छिद्र)

ओं अक्ष्णोर्मे चक्षुरस्तु।।3।। (इससे दोनों आंख)

ओं कर्णयोर्मे श्रोत्रमस्तु।4।। (इससे दोनों कान)

ओं बाह्वोर्मे बलमस्तु।।5।। (इससे दोनों बाह)

ओं ऊर्वोमे ओजोऽस्तु।।6।। (इससे दोनों जंघा)

ओं अरिष्टानि मेऽङ्गानि तनूस्तन्वा में सह सन्तु।।7।।

(इस मन्त्र से जल स्पर्श करके मार्जन करें)

ईश्वर प्रार्थना

ओउम विश्वानि देव सवितर्दुरितानि परासुव।
यद् भद्रं तत्र आसुव।।1।।

हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः परिरेक आसीत्
स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम।।2।।

य आत्मदा बलदा यस्य विश्व उपासते प्रशिषं यस्य देवाः।
यस्य च्छायाऽमृतं यस्य मृत्युः कस्मै देवाय हविषा विधेम।।3।।

यः प्रणातो निमिषतो महित्वैक इद्राजा जगतो बभूव। य ईशे
अस्य द्विपदश्चतुषपदः कस्मै देवाय हविषा विधेम।।4।।

येन द्यौरुग्रा पृथिवी च दृढ़ा येन स्वः स्तभितं येन नाकः।
यो अन्तरिक्षे रजसो विमानः कस्मै देवाय हविषा विधेम।।5।।

प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परिता बभूव।
यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयीणाम्।।6।।

स नो बन्धुर्जनिता स विधाता धामानि वेद भुवनानि विश्वा।
यत्र देवा अमृतमानशानास्तृतीये धामन्नध्यैरयन्त।।7।।

अग्ने नय सुपथा राये अस्मान् विश्वानि देव वयुनानि विद्वान।
युयोध्यस्मज्जुहुराण मेनो भूयिष्ठां ते नम उक्तिं विधेम।।8।।

अथ स्वस्तिवाचनम

ओ३म अग्निमीडे पुरोहितं यज्ञस्य देवमृत्विजम्।
होतारं रत्नाधातमम्।।1।।

स नः पितेव सूनवेऽग्ने सूपायनो भव। सचस्वा नः स्वस्तये।।2।।

स्वस्ति नो मिमीतामश्विना भगः स्वस्ति देव्यदितिरनर्वणः।
स्वस्ति पूषा असुरो दधातु नः स्वस्ति द्यावा पृथिवी सुचेतुना।।3।।

स्वस्तये वायुमुपब्रवामहै सोमं स्वस्ति भुवनस्य यस्पतिः।
बृहस्पतिं सर्वगणं स्वस्तये स्वस्तय आदित्यासो भवन्तु नः।।4।।

विश्वेदेवा नो अद्या स्वस्तये वैश्वानरो वसुरग्निः स्वस्तये।
देवा अवन्त्वृभवः स्वस्तये स्वास्ति नो रूद्रः पात्वंहसः।।5।।

स्वस्ति मित्रावरूणा स्वस्ति पथ्ये रेवति। स्वस्ति न
इन्द्राश्चाग्निश्च स्वस्ति नो अदिते कृधि।।6।।

स्वस्ति पन्थामनु चरेम सूर्याचन्द्रमासचिव।
पुनर्ददताघ्नता जानता संगमे महि।।7।।

ये देवानां यज्ञिया यज्ञियानां मनोर्यजत्रा अमृता ऋतज्ञाः।
ते नो रासन्तामुरूगायमद्य यूयं पात स्वस्तिभिः सदा नः।।8।।

येभ्यो माता मधुमत्पिवन्ते पयः पीयूषं द्यौरदितिरद्रिबर्हाः।
उक्थशुष्मान् वृषभरान्त्स्वप्न- सस्तां आदित्यां अनुमदा स्वस्तये।।9।।

नृ चक्षसो अनिमिषन्तो अर्हणा बृहदेवासो अमृतत्वमनाशुः।
ज्योतिरथा अहिमाया अनागसो दिवो वर्ष्माणं वसते स्वस्तये।।10।।

सम्राजो ये सुवृधो यज्ञमाययुरपरिह्वृता दधिरे दिवि क्षयम्।
तां आ विवास नमसा सुवृक्तिभिमहो आदित्यां अदितिं स्वस्तये।।11।।

को वः स्तोमं राधति यं जुजोषथ विश्वे देवासो मनुषो यतिष्ठन।
को वोऽध्वरं तुविजाता अरं करद्यो नः पर्षदत्यंहः स्वस्तये।।12।।

येभ्यो होत्रां प्रथममामायेजे मनुः समिद्धाग्निर्मनसा सप्त होतृभिः।
त आदित्या अभयं शर्म यच्छत सुगा नः कर्त सुपथा स्वस्तये।।13।।

य ईशिरे भुवनस्य प्रचेतसो विश्वस्य स्थातुर्जगतश्च मन्तवः।
ते नः कृतादकृता देनसस्पर्यद्या देवासः पिपृता स्वस्तये।।14।।

भरेष्विन्द्रं सुहवं हवामेऽहोमुचं सुकृतं दैव्यं जनम्।
अग्निं मित्रं वरुणं सातये भग द्यावापृथिवी मरुतः स्वस्तये।।15।।

सुत्रामाणं पृथिवीं द्यामनेहसं सुशर्माणमदितिं सुप्रणीतिम्।
दैवीं नावं स्वरित्रामनागसमस्रवन्तीमा रुहेमा स्वस्तये।।16।।

विश्वे यजत्रा अधि वोचतोतये त्रायध्वं नो दुरेवाया अभिहुतः।
सत्यया वो देवहूत्या हुवेम श्रृण्वतो देवा अवसे स्वस्तये।।17।।

अपामीवामप विश्वामनाहुतिमपारातिं दुर्विद–त्रामघायतः।
आरे देवा द्वेषो अस्मद्युयोतनोरु णः शर्म यच्छता स्वस्तये।।18।।

अरिष्टः स मर्तो विश्व एधते प्र प्रजाभिर्जायते धर्मणस्परि।
यमादित्यासो नयथा सुनीतिभिरति विश्वानि दुरिता स्वस्तये।।19।।

यं देवासोऽवथ वाजसातौ यं शूरसाता मरुतो हिते धने।
प्रातर्यावाणं रथमिन्द्र सानसिमरिष्यन्तमा रुहेमा स्वस्तये।।20।।

स्वस्ति नः पथ्यासु धन्वसु स्वस्त्यप्सु वृजने स्वर्वति।
स्वस्ति नः पुत्रकृथेषु योनिष स्वस्ति राये मरूतो दधातन।।21।।

स्वस्तिरिद्धि प्रपथे श्रेष्ठा रेक्णस्वत्यभि या वाममेति।
सा नो अमा सो अरणे निपातु स्वावेशा भवतु देवगोपा।।22।।

इषे त्वोर्ज्जे त्वा वायव स्थ देवोः वः सविता प्रार्पयतु श्रेष्ठतमाय
कर्मण आप्यायध्वमघ्न्या इन्द्राय भागं प्रजावतीरनमीवा अयक्ष्मा
मा व स्तेन ईशत माघशक्सो ध्रुवा अस्मिन् गोपतौ स्यात
बह्वीर्यजमानस्य पशून् पाहि।23।।

आ नो भद्राः क्रतवो यन्तु विश्वतोऽदब्धासोअपरीतास उद्भिदः।
देवा नो यथा सदमिद्वृधे असत्रप्रायुवो रक्षितारो दिवे दिवे।।24।।

देवानां भद्रा सुमतिर्र्ऋजूयतां देवाना रातिरभि नो निवर्त्तताम्
देवाना ंसख्यमुपसेदिमा वयं देवा न आयुः प्रतिरन्तु जीवसे।।24।।

तमीशानं जगतस्तस्थुषपतिं धियज्जिन्वमवसे हूमहे वयम्।
पूषा नो यथा वेदसामसद्वृधे रक्षिता पायुरदब्धः स्वस्तये।।26।।

स्वस्ति न इन्द्रो वृद्धश्रवा स्वस्ति नः पूषा विश्ववेदाः।
स्वस्तिनस्ताक्ष्र्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु।।27।।

भद्रं कर्णेभिः श्रृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः।
स्थिरैरङ्गैस्तुष्टुवा संस्तनूभिर्व्यशेमहि देवहितं यदायुः।।28।।

अग्न आ याहि वीतये गृणानो हव्यदातये।
नि होता सत्सि बर्हिषि।।29।।

त्वमग्ने यज्ञानांहोता विश्वेषां हितः। देवेभिर्मानुषे जने।।30।।

ये त्रिषप्ताः परियन्ति विश्वा रूपाणि बिभ्रतः।
वाचस्पतिर्बला तेषां तन्वो अद्य दधातु मे।।31।।

।।इति स्वस्तिवाचनम्।।

अथ शांतिप्रकरणम्

शं न इन्द्राग्नी भवतामवोभिः शं न इन्द्रावरुणा रातहव्या।
शमिन्द्रासोमा सुविताय शं योः शं न इन्द्रापूषणमा वाजसातौ।।1।।

शं न भगः शमु नः शंसो अस्तु शं नः पुरन्धिः शमु सन्त रायः।
शं नः सत्यस्य सुयमस्य शंसः शं नो अर्यमा पुरुजातो अस्तु।।2।।

शं नो धाता शमु धर्ता नो अस्तु शं नः उरूची भवतु स्वधाभिः।
शं रोदसी बृहती शं नो अद्रिः शं नो देवानां सुहवानि सन्तु।।3।।

शं नो अग्निर्ज्योतिरनीको अस्तु शं नो मित्रावरूणावश्विना शम।
शं नः सुकृतां सुकृतानि सन्तु शं न इषिरो अभि वातु वातः।।4।।

शं नो द्यावापृथिवी पूर्वहूतौ शमन्तरिक्षं दृशये नो अस्तु।
शं न ओषधीर्वनिनो भवन्तु शं नो रजसस्पतिरस्तु जिष्णुः।।5।।

शं न इंद्रो वसुभिर्देवो अस्तु शमादित्योभिर्वरूणः सुशंसः।
श नो रूद्रो रूद्रोभिर्जलाषः शं नस्तवष्टाग्निाभिरिह श्रृणोतृ।।6।।

शं नः सोमो भवतु ब्रह्म शं नः शं नो ग्रावाणः शमु सन्तु यज्ञाः।
शं नः स्वरूणां मितयो भवन्तु शं नः प्रस्वः शम्वस्तु वेदिः।।7।।

शं नः सूर्य उरूचक्षा उदेतु शं नश्चतस्रः प्रदिशो भवन्तु।
शं नः पर्वता ध्रवयो भवन्तु शं नः सिन्धवः शमु सन्त्वापः।।8।।

शं नो अदितिर्भवतु व्रतोभि शं नो भवन्तु मरूतः स्वर्काः।
शं नो विष्णु शमु पूषा नो अस्तु शं नो भवित्रं शम्वस्तु वायुः।।9।।

शं नो देवः सविता त्रायमाणः शं नो भवन्तूषसो विभातीः।
शं नः पर्जन्यो भवतु प्रजाभ्यः शं नः क्षेत्रस्य पतिरस्तु शम्भुः।।10।।

शं नो देवा विश्वदेवा भवन्तु शं सरस्वती सह धीभिरस्तु।
शमभिषाचः शमु रातिषाचः शं नो दिव्याः पार्थिवाः शं नो अप्या।।11।।

शं नः सत्यस्य पतयो भवन्तु शं नो अर्वन्तः शमु सन्तु गावः।
शं नः ऋभवः सुकृत सुहस्ताः शं नो भवंतु पितरो हवेषु।।12।।

शं नो अज एकपाद् देवो अस्तु शं नोऽहिर्बुध्न्यः शं समुद्रः।
शं नो अपां नपात्पेरूरस्तु शं नः पृश्निर्भवतु देवगोपा।।13।।

इन्द्रो विश्वस्य राजति। शं नो अस्तु द्विपदे शं चतुष्पदे।।14।।

शं नः वातः पवतां शंनस्तपतु सूर्यः। शं नः कनिक्रदद्देवः
पर्जन्यो अभि वर्षतु।।15।।

अहानि शं भवन्तु नः शं रात्रिः प्रतिधीयताम्। शं न इन्द्राग्नि
भवतामावोभि शं न इन्द्रावरुणा रातहव्या। शं न इन्द्रापूषणा
वाजसातौ शमिन्द्रासोमा सुविताय शं योः।।16।।

शं नो देवी रभिष्टय आपो भवन्तु पीतये शं योरभिस्रवन्तु नः।।17।।

द्यौः शान्तिरन्तरिक्षः शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः
शान्तिः। वनस्पतयः शान्तिर्विश्वे देवाः शान्तिर्ब्रह्म सर्वत्रंशान्ति
शान्तिरेव शान्तिः सा मा शान्ति रेधि।।18।।

तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत्। पश्येम शरदः शतं जीवेम शरदः शथ श्रृणुयाम शरदः शतं प्र ब्रवाम शरदः शतमदीनाः स्याम शरदः शतं भूयश्च शरदः शतात्।।19।।

यज्जाग्रतो दूरमुदैति दैवं तदु सुप्तस्य तथैवैति।
दूरंगमं ज्योतिषा ज्योतिरेकं तन्मे मनः शिवसंकल्पमस्तु।।20।।

येन कर्माण्यपसो मनीषीणो यज्ञे कृण्वन्ति विदथेषु धीराः।
यदपूर्वं यक्षमन्तः प्रजानां तन्मे मनः शिवसंकल्पमस्तु।।21।।

यत्प्रज्ञानमुत चेतो धृतिश्च यज्जयोतिरन्तरमृतं प्रजासु।
यस्मान्नऋते किंचन कर्म क्रियते तन्मे मनः शिवसंकल्पमस्तु।।22।।

येनेदं भूतं भुवनं भविष्यत्परिग्रहीतममृतेन सर्वम्।
येन यज्ञस्तायते सप्तहोता तन्मे मनः शिसंकल्पमस्तु।।23।।

यस्मिन्नृचः साम यजूंषि यस्मिन् प्रतिष्ठिता रथनाभाविवाराः।
यस्मिंश्चितथ सर्वमोतं प्रजानां तन्मे मनः शिवसंकल्पमस्तु।।24।।

सुषारथिरश्वानिव यन्मनुष्यान्नेनीयतेऽभी शुभिर्वाजिन इव।
हत्प्रतिष्ठं यदजिरं जविष्ठं तन्मे मनः शिवसंकल्पमस्तु।।26।।

अभयं नः करत्यन्तरिक्षममभयं छावापृथिवी उभे इमे।
अभयं पश्चादभयं पुरस्तादुत्तरादधरादभयं नो अस्तु।।27।।

अभयं मित्रादभयममित्रादभयं ज्ञातादभयं परोक्षात्।
अभयं नक्तमभयं दिवा नः सर्वा आशा मम मित्रं भवन्तु।।28।।

।।इति शान्तिकरणम्।।

अग्न्याधान मन्त्र

ओं भूर्भुवः स्वः।

इस मन्त्र से कड़छी में धरे कपूर में अग्नि प्रदीप्त करें।

ओं भूर्भुवः स्वद्यौरिव भूम्ना पृथिवी वरिम्णा।
तस्यास्ते पृथिवी देवयजनि पृष्ठेऽग्निमन्नादमन्नाद्यायादधे।।

इस मन्त्र से वेदी के बीच में अग्नि को धर, उस पर छोटे-छोटे काष्ठ और कपूर धर अगला मन्त्र पढ़कर पंखे से अग्नि को प्रदीप्त करें।

अग्नि प्रदीपन मन्त्र

ओं उद् बुध्यस्वाग्ने प्रतिजागृहि त्वमिष्टापूर्ते संथ सृजेथामयं च।
अस्मिन्त्सधस्थे अध्युत्तरस्मिन् विश्वे देवा यजमानश्च सीदत।

जब अग्नि समिधाओं में प्रविष्ठ होने लगे तब चन्दन की अथवा पलाश आदि की तीन लकड़ी आठ–आठ अंगुल की घृत में डुबा उनमें से नीचे लिखे एक एक मन्त्र से एक एक समिधा को अग्नि में डालें।

समिधाधान मन्त्र

ओं अयं त इध्म आत्मा जातवेदस्तेनेध्यस्व वर्धस्व चेद्ध वर्द्धय चास्मान् प्रजया पशुभिर्ब्रह्म–वर्चसेनान्नाद्येन समेधय स्वाहा।। इदमग्नये जातवेदसे–इदन्न मम।।1।। अब पहली सुविधा की आहुति देवें।

ओं समिधाग्निं दुवस्यत घृतैर्बोधयतातिथिम्। अस्मिन् हव्या जुहोतन स्वाहा। इदमग्नये इदन्न मम।।2।।

ओं सुसमिद्धाय शेचिषे घृतं तीव्रं जुहोतन। अग्नये जातवेदसे स्वाहा। इदमग्नये जातवेदसेइदनन मम।।3।। अब दूसरी समिधा की आहुति देवें।

ओं तन्त्वा समिद्भिरङ्गिरो घृतेन वर्द्धयामसि। बृहच्छोचा यविष्ठ्य स्वाहा। इदमग्नयेऽङिगरसेइदन्न मम।।4।।
इस मन्त्र से तीसरी समिधा की आहुति देवें।

घृताहुति मन्त्र

(निम्न मन्त्र को पांच बार बोलकर 5 घृत की आहुति देवें)

ओं अयंत इध्म आत्मा जातवेदस्तेनेध्यस्व वर्धस्व चेद्ध वर्द्धय
चास्मान् प्रजया पशुभिर्ब्रह्मवर्चसेनात्राद्येन समेधय स्वाह।।
इदमग्नये जातवेद से–इदन्न मम।।

जल प्रसेचन मन्त्र

अंजलि में जल लेकर वेदों के चारों ओर छिडकावें।

ओं अदितेऽनुमन्यस्व।।1।। इस मन्त्र से पूर्व की ओर।

ओं अनुमतेऽनुमन्यस्व।।2।। इससे पश्चिम की ओर।

ओं सरस्वत्यनुमन्यस्व।।3।। इससे उत्तर की ओर।

ओं देव सवितः प्रसुव यज्ञं प्रसुव यज्ञपतिं भगाय।
दिव्यो गन्धर्व केतपूः केतं नः पुनात वाचस्पतिर्वाचं न स्वदतु।।4।।
इस मन्त्र से वेदी के चारों ओर जल छिड़कावें।

आघारावाज्याहुति

ओं अग्नये स्वाहा। इदमग्नये इदन्न मम।।1।।
इस मन्त्र से वेदी के उत्तर में आहुति देवें।
ओं सोमाय स्वाहा। इदं सोमाय इदन्न मम।।2।।
इस मन्त्र से वेदी के दक्षिण भाग में प्रज्जवलित समिधा पर आहुति देवें।

आज्यभागाहुति

(इन दो मन्त्रों से वेदी के मध्य में आहुति देवें)

ओं प्रजापतये स्वाहा। इदं प्रजापतये–इदन्न मम।।1।।

ओं इन्द्राय स्वाहा। इदं इन्द्राय–इदन्न मम।।2।।

सामान्य प्रकरणम्

अग्नयाधान् समिधाधान् 5 घृताहुति, जलप्रसेचन तथा आघारावाज्यभागाहुति करने के पश्चात् घी की चार आहुति देवें।

ओं भूरग्नये स्वाहा। इदमग्नये–इदन्न मम।।

ओं भुवर्वायवे स्वाहा। इदं वायवे–इदन्न मम।।

ओं स्वरादित्याय स्वाहा। इदमादित्याय–इदन्न मम।।

ओं भूर्भुवः स्वरग्निवायवादित्येभ्यः स्वाहा।

इदमग्निवायवादित्येभ्यः–इदन्न मम।।

तत्पश्चात् निम्न मन्त्र से एक आहुति घी अथवा भात की स्विष्टकृत होम की देवें।

ओं यदस्य कर्मणोऽत्यरीरिचं यद्वा न्यूनमिहाकरम्। अग्निष्टत्स्विष्ट कृद्विद्यात्सर्वंस्विष्टं सुहुंत करोतु मे। अग्नये स्विष्टकृते सुहुतहुते, सर्वप्रायश्चित्ताहुतीनां कामानां समर्द्धयित्रे सर्वात्रः कामान्त्समर्द्धय स्वाहा। इदमग्नये स्विष्टकृते–इदन्न मम।।

एक आहुति ''प्रजापत्याहुति'' निम्न मन्त्र को (मौन रहकर) मन ही मन बोल कर देवें।

ओं प्रजापतये स्वाहा। इदं प्रजापतये–इदन्न मम।।1।।

अब निम्न चार ''आज्याहुति'' घी की देवें।

ओउम् भूर्भुवः स्वः। अग्न आयूंषि पवस आसुवोर्जमिषं च नः आरे बाधस्व दुच्छुनां स्वाहा। इदमग्नये पवमानाय इदन्न मम।।1।।

ओउम् भूर्भुवः स्वः। अग्निर्ऋषिः पवमानः पांचजन्यः पुरोहितः। तमीमहे महागयं स्वाहा। इदमग्नये पवमानाय इदन्न मम।।2।।

ओउम् भूर्भुवः स्वः। अग्ने पवस्व स्वपा अस्मे वर्चः सुवीर्यम्। दधद्रयिं मयि पोषं स्वाहा। इदमग्नये पवमानाय इदन्न मम।।3।।

ओउम् भूर्भुवः स्वः। प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परि ना बभूव। यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयीणाम् स्वाहा। इदं प्रजापतये–इदन्न मम।।4।।

अब निम्न मन्त्रों से आठ''आज्याहुति'' देवें।

ओउम् त्वं नो अग्ने वरूणस्य विद्धान देवस्य हे डोऽवयासिसीष्ठाः यजिष्ठो वहिनतमः शोशुचानो विश्व द्वेषांसि प्रमुमुग्धयस्मत् स्वाहा। इदमग्निवरूणाभ्यां इदन्न मम ।।1।।

ओउम् स त्वं नो अग्नेऽवमो भवोति नेदिश्ठो अस्या उशसी व्युष्टौ।
अव यक्ष्व नो वरूणं रराणो वीहि मृळीकं सुहवो न एधि स्वाहा।
इदमग्निवरूणाभ्यां इदन्न मम।।2।।

ओउम इमं मे वरूण श्रुधी हवमद्या च मृडय। त्वामवस्युराचके स्वाहा।
इदं वरूणाय–इदन्न मम।।3।।

ओउम तत्वा यामि ब्रंहणा वन्दमानस्तदा षास्ते यजमानो हविर्भिः।
अहेडमानो वरूणेह बोध्युरूशंस मा न आयुः प्रमोषीः स्वाहा।
इदं वरूणाय–इदन्न मम।।4।।

ओउम ये ते शतं वरूण ये सहत्रं यज्ञियाः पाशा वितता महान्तः। तेभिर्नो
अद्य सवितोत विष्णुर्विश्वे मुञ्चन्तु मरूतः स्वर्क्काः स्वाहा। इदं वरूणाय
सवित्रेविष्णावे विश्वेभ्यो देवोभ्यो मरूद्भ्यः स्वर्केभ्यः इदन्न मम।।5।।

ओउम अयाश्चाग्नेऽस्यनभिशस्तिपाश्च सत्यमित्त्वमयासि। अया नो
यज्ञं वहास्यया नो धेहि भेषजथं स्वाहा। इदमग्नये अयसे–इदन्न मम।।6।।

ओउम उदुत्तमं वरूण पाशमस्मदवाधमं वि मध्यमं श्रथाय। अथा वयमादित्य
व्रते तवानागसो अदितये स्याम स्वाहा। इदं वरूणायाऽऽदित्यायादितये
च–इदन्न मम।।7।।

ओं भवतन्न समनसौ सचेतसावरे पसौ। मा यज्ञथं हिं सिष्टं मा यज्ञपतिं
जातवेदसौ शिवो भवतमद्य नः स्वाहा। इदं जातवेदोभ्याम् इदन्न मम।।8।।

प्रातः काल आहुति के मन्त्र

ॐ सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहा।।1।।

ॐ सूर्यो वर्चो ज्योतिर्वर्चः स्वाहा।।2।।

ॐ ज्योतिः सूर्यः सूर्योज्योतिः स्वाहा।।3।।

ॐ सजूर्देवेन सवित्रा सजूरूषसेन्द्रवत्या जुशाणः सूर्यो वेतु स्वाहा।।4।।

सायं काल आहुति के मन्त्र

ॐ अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा।।1।।

ॐ अग्निर्वर्चो ज्योतिर्वर्चः स्वाहा।।2।।

निम्न मन्त्र को मौन रहकर मन में उच्चारण करके आहुति देवें–

ॐ अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा।।3।।

ॐ सजूर्देवेन सवित्रा सजूरात्रयेनद्रवत्या जुषाणो अग्निर्वेतु स्वाहा।।4।।

अब इन मन्त्रों से दोनों समय की आहुति देवें–

प्रातः और सायं दोनों काल के मन्त्र

ओं भूरग्नये प्राणाय स्वाहा। इदमग्नये प्राणाय इदन्न मम।।1।।

ओं भुवर्वायवेऽपानाय स्वाहा। इदं वायवेऽपानाय इदन्न मम।।2।।

ओं स्वरादित्पाय व्यानाय स्वाहा। इदमादित्याय व्यानाय इदन्न मम।।3।।

ओं भूर्भुवः स्वरग्निवायवादित्येभ्यः प्राणापानव्यानेभ्यः स्वाहा।

इदमग्निवायवादित्येभ्यः प्राणापानव्यानेभ्यः इदन्न मम ।।4।।

ओं आपो ज्योतिरसोऽमृतं ब्रह्म भूर्भुवः स्वरों स्वाहा।।5।।

ओं यां मेधां देवगणाः पितरश्चोपासते। तया मामद्य
मेधयाऽग्ने मेधाविनं कुरु स्वाहा।।6।।

ओं विश्वानि देव सवितर्दुरितानि परा सुव। यद्भद्रं तन्न
आ सुव स्वाहा।।7।।

ओं अग्ने नय सुपथा राये अस्मान् विश्वानि देव वयुनानि विद्वान।
युयोध्यस्मज्जुहुराण मेनो भूयिष्ठां ते नम उक्तिं विधेम स्वाहा।।8।।

गायत्री मन्त्र

ओउम भूर्भुवः स्वः। तत् सवितुर्वरेण्यम् भर्गो देवस्य धीमहि।
धियो यो नः प्रचोदयात्।।

महामृत्युंजय मन्त्र

ओं त्रयम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम्। उर्वारुकमिव
बन्धनान्मृत्यो मुक्षीय माऽमृतात्।।

निम्न मन्त्र से तीन पूर्णाहुति अर्थात् एक–एक बार पढ़के एक–एक करके तीन आहुति देवें।

पूर्णाहुति मन्त्र

ओउम सर्वं वै पूर्णं स्वाहा।।

वैदिक प्रार्थना

पूर्णाहुति के पश्चात् बचे हुए घी में जल डालकर सभी सज्जन उस जल को हाथ से स्पर्श कर हाथ, पैर, मुख का मर्दन करके इन्द्रियों को बलवान बनाने के लिये निम्न मन्त्रों से भगवान की प्रार्थना करें।

ओं तनूपाऽग्नेऽसि तन्वन्मेपाहि।

ओं आयुर्दाऽग्नेऽस्यायुर्मे देहि।

ओं वर्चोदाऽग्नेऽसि वर्चो में देहि।

ओं अग्ने यन्में तन्वा ऊनं तन्म आपृण।

ओं तेजोऽसि तेजो मयि देहि।

ओं वीर्यमसि वीर्य मयि देहि।

ओं बलमसि बलं मयि धेहि।

ओं ओजोऽस्योजोमयि धेहि।

ओं मन्यु रसि मन्युं मयि धेहि।

ओं सहोऽसि सहो मयि धेहि।

ओं यतेऽग्ने तेजस्तेनाऽहं तेजस्वी भूयासम्। ओं यत्तेऽग्ने वर्चस्तेनाऽहं वर्चस्वी भूयासम्। ओं यत्तेऽग्ने हस्तेनाऽहं हरस्वी भूयासम्।

ओं मेधां में देवः सविता आददातु। ओं मेधा में देवी सरस्वती आददातु।

ओं मेधां में अश्विनी देवावाधत्तां पुष्करस्रजौ।

यज्ञ रूप प्रार्थना

यज्ञरूप प्रभो हमारे भाव उज्जवल कीजिये।
छोड देवें छल कपट को मानसिक बल दीजिये।
वेद की बोलें ऋचायें सत्य को धारण करें।
हर्ष में हों मग्न सारे शोक सागर से तरें।।
अश्वमेधादिक रचायें यज्ञ पर उपकार को।
धर्म मर्यादा चलाकर लाभ दें संसार को।।
नित्य श्रद्धा भक्ति से यज्ञादि हम करते रहें।
रोग पीड़ित विश्व के सन्ताप सब हरते रहें।।
भावना मिट जायें मन से पाप अत्याचार की।।
कामनायें पूर्ण होंवे यज्ञ से नर–नार की।।
लाभकारी हो हवन हर प्राणधारी के लिये।
वायु जल सर्वत्र हों, शुभ गन्ध को धारण किये।।
स्वार्थ भाव मिटे हमारा प्रेम पथ विस्तार हो।
'इदत्रमम' का सार्थक प्रत्येक में व्यवहार हो।।
हाथ जोड झुकाय मस्तक वन्दना हम कर रहें।
'नाथ' करूणा रूप करूणा आपकी सब पर रहे।

कामना

सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।

सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुखः भाग्भवेत्।।

सुखी बसे संसार सब दुखिया रहे न कोय।

यह अभिलाषा हम सबकी मेरे भगवान पूरी होय।।

विद्या, बुद्धि, तेज, बल सबके भीतर होय।

दूध–पूत–धन धान्य से वंचित रहे न कोय।।

आप की भक्ति प्रेम से मन होवे भरपूर।

राग–द्वेष से चित्त मेरा कोसों भागे दूर।।

मिले भरोसा आपका सदा हमें जगदीश।

आशा तेरे धाम की बनी रहे मम ईश।।

पाप से मुझे बचाइये करके दया दयाल।

अपना भक्त बनाय के हमको करो निहाल।।

दिल में दया उदारता मन में प्रेम अपार।

हिय में धीरज वीरता सबको दो करतार।।

।।शान्ति पाठ।।

ओं द्यौः शान्तिरन्तरिक्षग्वं शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः। वनस्पतस्यः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्म शान्तिः सर्वग्वं शान्ति शान्तिरेव शान्तिः सामा शान्तिरेधि। ओउम शान्तिः शान्तिः शान्तिः।।